শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ৩৯

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৩৯

*যোগমাযানযনাদিৱর্ণনম্*

ভৱন্তমযমুদ্বহন্ যদুকুলোদ্বহো নিসসরন
দদর্শ গগনোচ্চলজ্জলভরাং কলিন্দাত্মজাম্।
অহো সলিলসঞ্চযঃ স পুনরৈন্দ্রজালোদিতো
জলৌঘ ইৱ ততক্ষণাত্ প্রপদমেযতামাযযৌ॥ ১॥

প্রসুপ্তপশুপালিকাং নিভৃতমারুদদবালিকা-
মপাৱৃতকৱাটিকাং পশুপৱাটিকামাৱিশন্।
ভৱন্তমযমর্পযন্ প্রসৱতল্পকে ততপদা-
দ্বহন্ কপটকন্যকাং স্বপুরমাগতো ৱেগতঃ॥ ২॥

ততস্তৱদনুজারৱক্ষপিতনিদ্রৱেগদ্রৱদ-
ভটোতকরনিৱেদিতপ্রসৱৱার্তযৈৱার্তিমান্।
ৱিমুক্তচিকুরোতকরস্তৱরিতমাপতন্ ভোজরা-
ডতুষ্ট ইৱ দৃষ্টৱান্ ভগিনিকাকরে কন্যকাম্॥ ৩॥

ধ্রুৱং কপটশালিনো মধুহরস্য মাযা ভৱে-
দসাৱিতি কিশোরিকাং ভগিনিকাকরালিঙ্গিতাম্।
দ্বিপো নলিনিকান্তরাদিৱ মৃণালিকামাক্ষিপ-
ন্নযং ত্বদনুজামজামুপলপট্টকে পিষ্টৱান্॥ ৪॥

ততো ভৱদুপাসকো ঝটিতি মৃত্যুপাশাদিৱ
প্রমুচ্য তরসৈৱ সা সমধিরূঢরূপান্তরা।
অধস্তলমজগ্মুষী ৱিকসদষ্টবাহুস্ফুর-
ন্মহাযুধমহো গতা কিল ৱিহাযসা দিদ্যুতে॥ ৫॥

নৃশংসতৰ কংস তে কিমু মযা ৱিনিষ্পিষ্টযা
    বভূৱ ভৱদন্তকঃ ক্বচন চিন্ত্যতাং তে হিতম্।
ইতি ত্বদনুজা ৱিভো খলমুদীৰ্য তং জগ্মুষী
    মৰুদ্গণপণাযিতা ভুৱি চ মন্দিৰাণ্যেযুষী॥ ৬ ॥

প্ৰগে পুনৰগাত্মজাৱচনমীৰিতা ভূভুজা
    প্ৰলম্ববকপূতনাপ্ৰমুখদানৱা মানিনঃ।
ভৱন্নিধনকাম্যযা জগতি বভ্ৰুমুৰ্নিৰ্ভযাঃ
    কুমাৰকৱিমাৰকাঃ কিমিৱ দুষ্কৰং নিষ্কৃপৈঃ॥ ৭ ॥

ততঃ পশুপমন্দিৰে ত্বযি মুকুন্দ নন্দপ্ৰিযা-
    প্ৰসূতিশযনেশযে ৰুদতি কিঞ্চিদঞ্চত্পদে।
ৱিবুধ্য ৱনিতাজনৈস্তনযসম্ভৱে ঘোষিতে
    মুদা কিমু ৱদাম্যহো সকলমাকুলং গোকুলম্॥ ৮ ॥

অহো খলু যশোদযা নৱকলাযচেতোহৰং
    ভৱন্তমলমন্তিকে প্ৰথমমাপিবন্ত্যা দৃশা।
পুনঃ স্তনভৰং নিজং সপদি পাযযন্ত্যা মুদা
    মনোহৰতনুস্পৃশা জগতি পুণ্যৱন্তো জিতাঃ॥ ৯ ॥

ভৱতকুশলকাম্যযা স খলু নন্দগোপস্তদা
    প্ৰমোদভৰসঙকুলো দ্বিজকুলায কিন্নাদদাত্।
তথৈৱ পশুপালকাঃ কিমু ন মঙগলং তেনিৰে
    জগত্ত্ৰিতযমঙগল ত্বমিহ পাহি মামামযাত্॥ ১০ ॥

**********

www.prapatti.com